# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर/दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ७** | गुणाः - ७० |
| विषयः – वेदः | **कोड – C.E.1.1.1** | समयः – ३: ००तः ६:०० |
| दिनाङ्कः – १२-१२-२०१६ | सन्दर्भग्रन्थः – वैदिकसूक्तसंग्रह | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** ०८

(१) अग्निः पूर्वेभिः ऋषिभिरीड्यो नुतनैरुत। स देवाँ एह वक्षति॥

(२) विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि।
यो अस्कभायदुत्तरं सधस्थंविचक्रमाणस्त्रेधोरुगायः॥

(३) प्रवाच्यं शश्वधा वीर्यं तदिन्द्रस्य कर्म यदहिं विवृश्चत्।
वि वज्रेण परिषदो जघाना यन्नापोऽयनमिच्छमानाः॥

**प्रश्नः – २ ग्रन्थदिशा विश्वामित्रनदीसंवादसूक्तस्य वर्णनं कुरुत।** ०८

**अथवा**

**ग्रन्थानुसारं वाक्सूक्तस्य महत्वं प्रतिपादयत।**

**प्रश्नः – ३ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) विष्णुदेवः (३) आचार्यसायणः

(२) मन्त्रद्रष्टारः ऋषयः (४) शतुद्रीनदी

**प्रश्नः – ४ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) अग्निसूक्तस्य मन्त्रद्रष्टाऋषिः कः?

(२) ईड्धातोः अर्थं लिखत।

(३) वाक्सूक्तस्य मण्डलक्रमः कः?

(४) अग्निः कस्य लोकस्य देवोऽस्ति?

(५) 'विष्णु' इत्यस्य कोऽर्थः ?

(६) कस्मिन् मण्डले विश्वामित्रनदीसंवादसूक्तं विद्यते?

(७) 'दोषावस्त' इति शब्दस्य कोऽर्थः ?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्या विधेया।** ०८

(१) यत्पर्जन्य कनिक्रदत् स्तनयन् हंसि दुष्कृतः
प्रतीदं विश्वंमोदते तत्किं च पृथिव्यामधि॥

(२) न स स्वो दक्षो वरण धृतिः सा सुरामन्युर्विभीदको अचित्तिः।
अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता॥

(३) इदं पितृभ्यो नमोअस्त्वद्य ये पूर्वासो य उपरास ईयुः।

ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु

**प्रश्नः – ६ पर्जन्यसूक्तस्य विषयवस्तु प्रस्तूयताम्।** ०८

**अथवा**

**पितृसूक्तानुसारं पितृवर्णनं कुरु।**

**प्रश्नः – ७ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) पर्जन्यस्यावश्यकता (३) वरुणदेवस्य वैशिष्ट्यम्

(२) पितृसेवायाः फलम् (४) बर्हिषदः पितरः

**प्रश्नः – ८ अधोलिखितेषु पञ्चानाम् अर्थं लिखत ।** ०५

(१) पात (२) हव्यम् (३) अवन्तु (४)नूनम् (५) स्वधा (६) पुरोडाशः (७) अव

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ९ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्या विधेया।** ०८

(१) नमा मिमेथ न जिहीळ एषा शिवा सखिभ्य उत मह्यमासीत्।
अक्षस्या हमेकपरस्य हेतोरनु व्रतामप जायामरोधम्॥

(२) यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनःशिवसंकल्पमस्तु ॥

(३) येत्रिषप्ताः परियन्ति विश्वारुपाणि बिभ्रतः।
वाचस्पतिर्बला तेषां तन्वोऽ अद्य दधातु मे ॥

**प्रश्नः – १० अक्षसूक्तस्य विषयवस्तु प्रस्तूयताम् ।** ०८

**अथवा**

**आधुनिकसमाजं प्रति शिवसंकल्पसूक्तस्योपादेयता विवेच्यताम् ।**

**प्रश्नः – ११ टिप्प्पणीं लिखत। (एकस्य)** ०२

(१) मेधाजननोपायाः (२) सभासमितिश्च

**प्रश्नः – १२ अधोनिर्दिष्टेषु द्वयोः लघूत्तरं यच्छ।** ०२

(१) अक्षकितवसूक्तस्य ऋषिः कः ?

(२) मेधाजननसूक्तं कस्मिन् वेदे वर्तते?

(३) “श्वश्रूः” इति शब्दस्य कोऽर्थः ?

(४) शोवसंकल्पसूक्तस्य ऋषिः कः ?

***